श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

## श्री गरुडमहापुराणे पूर्वखण्डे

# ॥ श्री वैष्णवकवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वैष्णवकवचम् ॥

हरिरुवाच
सर्वव्याधिहरं वक्ष्ये वैष्णवं कवचं शुभम्।
येन रक्षा कृता शम्भोर्नात्र कार्या विचारणा॥ 1 ॥

प्रणम्य देवमीशानमजं नित्यमनामयम्।
देवं सर्वेश्वरं विष्णुं सर्वव्यापिनमव्ययम्॥ 2 ॥

बध्नाम्यहं प्रतीकारं नमस्कृत्य जनार्दनम्।
अमोघाप्रतिमं सर्वं सर्वदुःखनिवारणम्॥ 3 ॥

विष्णुर्मामग्रतः पातु कृष्णो रक्षतु पृष्ठतः।
हरिर्मे रक्षतु शिरो हृदयञ्च जनार्दनः॥ 4 ॥

मनो मम हृषीकेशो जिह्वां रक्षतु केशवः।
पातु नेत्रे वासुदेवः श्रोत्रे सङ्कर्षणो विभुः॥ 5 ॥

प्रद्युम्नः पातु मे घ्राणमनिरुद्धस्तु चर्म च।
वनमाली गलस्यान्तं श्रीवत्सो रक्षतामधः॥ 6 ॥

पार्श्वं रक्षतु मे चक्रं वामं दैत्यनिवारणम्।
दक्षिणं तु गदादेवी सर्वासुरनिवारिणी॥ 7 ॥

उदरं मुसलं पातु पृष्ठं मे पातु लाङ्गलम्।
ऊर्ध्वं रक्षतु मे शार्ङ्गं जङ्घे रक्षतु नन्दकः॥ 8 ॥

पार्ष्णी रक्षतु शङ्खश्च पद्मं मे चरणावुभौ।
सर्वकार्यार्थसिद्ध्यर्थं पातु मां गरुडः सदा॥ 9॥

वराहो रक्षतु जले विषमेषु च वामनः।
अटव्यां नारसिंहश्च सर्वतः पातु केशवः॥ 10॥

हिरण्यगर्भो भगवान् हिरण्यं मे प्रयच्छतु।
साङ्ख्याचार्यस्तु कपिलो धातुसाम्यं करोतु मे॥ 11॥

श्वेतद्वीपनिवासी च श्वेतद्वीपं नयत्वजः।
सर्वान् शत्रून् सूदयतु मधुकैटभसूदनः॥ 12॥

सदाकर्षतु विष्णुश्च किल्बिषं मम विग्रहात्।
हंसो मत्स्यस्तथा कूर्मः पातु मां सर्वतो दिशम्॥ 13॥

त्रिविक्रमस्तु मे देवः सर्वपापानि कृन्ततु।
तथा नारायणो देवो बुद्धिं पालयतां मम॥ 14॥

शेषो मे निर्मलं ज्ञानं करोत्वज्ञाननाशनम्।
वडवामुखो नाशयतु कल्मषं यत्कृतं मया॥ 15॥

पद्भ्यां ददातु परमं सुखं मूर्ध्नि मम प्रभुः।
दत्तात्रेयः कलयतु सपुत्रपशुबान्धवम्॥ 16॥

सर्वानरीन् नाशयतु रामः परशुना मम।
रक्षोघ्नस्तु दाशरथिः पातु नित्यं महाभुजः॥ 17॥

शत्रून्हलेन मे हन्याद्रामो यादवनन्दनः।
प्रलम्बकेशिचाणूरपूतनाकंसनाशनः।
कृष्णस्य यो बालभावः स मे कामान्प्रयच्छतु॥ 18॥

अन्धकारतमोघोरं पुरुषं कृष्णपिङ्गलम्।
पश्यामि भयसन्त्रस्तः पाशहस्तमिवान्तकम्॥ **19** ॥

ततोऽहं पुण्डरीकाक्षमच्युतं शरणं गतः।
धन्योऽहं निर्भयो नित्यं यस्य मे भगवान्हरिः॥ **20** ॥

ध्यात्वा नारायणं देवं सर्वोपद्रवनाशनम्।
वैष्णवं कवचं बद्ध्वा विचरामि महीतले॥ **21** ॥

अप्रधृष्योऽस्मि भूतानां सर्वदेवमयो ह्यहम्।
स्मरणाद्देवदेवस्य विष्णोरमिततेजसः॥ **22** ॥

सिद्धिर्भवतु मे नित्यं यथा मन्त्रमुदाहृतम्।
यो मां पश्यति चक्षुर्भ्यां यं च पश्यामि चक्षुषा।
सर्वेषां पापदुष्टानां विष्णुर्बध्नाति चक्षुषी॥ **23** ॥

वासुदेवस्य यच्चक्रं तस्य चक्रस्य ये त्वराः।
ते हि छिन्दन्तु पापानि मम हिंसन्तु हिंसकान्॥ **24** ॥

राक्षसेषु पिशाचेषु कान्तारेष्वटवीषु च।
विवादे राजमार्गेषु द्यूतेषु कलहेषु च॥ **25** ॥

नदीसन्तारणे घोरे संप्राप्ते प्राणसंशये।
अग्निचौरनिपातेषु सर्वग्रहनिवारणे॥ **26** ॥

विद्युत्सर्पविषोद्वेगे
रोगे च विघ्नसङ्कटे।
जप्यमेतज्जपेन्नित्यं
शरीरे भयमागते॥ **27** ॥

अयं भगवतो मन्त्रो मन्त्राणां परमो महान्।
विख्यातं कवचं गुह्यं सर्वपापप्रणाशनम्।
स्वमायाकृतनिर्माणकल्पान्तगहनं महत्॥ **28**॥

॥ इति श्री वैष्णवकवचं समाप्तम्॥